## ससजुषो रुः । (६६/१६२)

सकारान्तस्य पदस्य सजुष् इत्येतस्य च [1]रुः भवति । सकारान्तस्य – अग्निरत्र । वायुरत्र । सजुषः – '[2]सजूर्ऋतुभिः' (मै. २.८.१) । 'सजूर्देवेभिः' (ऋ. ७.३४.१५) । जुषेः क्विपि [3]सपूर्वस्य रूपमेतत् ॥

## अवयाः श्वेतवाः पुरोडाश्च । (६७/३४१६)

अवयाः श्वेतवाः पुरोडाः इत्येते[4] निपात्यन्ते । अवपूर्वस्य यजेः, श्वेतपूर्वस्य वहेः, पुरस्पूर्वस्य [5]दाशतेः 'मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्' (३.२.७१/३४१४), 'अवे यजः' (३.२.७२/३४१५) इति ण्विनि कृते, 'श्वेतवहादीनां डस्पदस्य' (वा. २६३) इति[6] डस्प्रत्यये निपातनानि एतानि । [7]किमर्थं तर्हि निपातनं यावता पूर्वेणैव रुः सिद्धः, दीर्घत्वमपि 'अत्वसन्तस्य चाधातोः' (६.४.१४/४२५) इति ? सम्बुद्धौ दीर्घार्थमेते निपात्यन्ते । 'अत्वसन्तस्य चाधातोः' (६.४.१४/४२५) इत्यत्र हि असम्बुद्धौ इति वर्तते । हे अवयाः (वा. सं. ३.४६) । हे श्वेतवाः । हे पुरोडाः (ऋ. ३.२८.२) । चकारोऽनुक्तसमुच्चयार्थः । हे उक्थशाः (तै. ३.२.९.१) ॥

## अहन् । (६८/४४३)

अहन् इत्येतस्य पदस्य रुः भवति । अहोभ्याम् । अहोभिः । [8]नलोपमकृत्वा निर्देशो [9]ज्ञापकः [10]नलोपाभावो यथा स्यात् [11]इति । दीर्घाहा निदाघः, [12]हे दीर्घाहोऽत्र इति । [13]अहन् इत्यत्र तु लाक्षणिकत्वादहन्शब्दस्य [14]रुः न भवति ।

[९२४] अह्नो रुविधौ रूपरात्रिरथन्तरेषू[15]पसङ्ख्यानं [16]कर्तव्यम् । (म. भा. ३.४११)

अहोरूपम् । अहोरात्रः । अहोरथन्तरम् । 'रोऽसुपि' (८.२.६९/१७२) इत्यस्यापवादो रुत्वमुपसङ्ख्यायते । अपर आह – सामान्येन रेफादौ रुत्वं भवति, अहोरम्यम्, अहोरत्नानि इति ॥

## रोऽसुपि । (६९/१७२)

अहन् इत्येतस्य रेफादेशो भवति असुपि परतः । अहर्ददाति । अहर्भुङ्क्ते । असुपि इति किम् ? अहोभ्याम् । अहोभिः । ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति, अहर्ददाति, अहर्भुङ्क्ते इति ? नैतदस्ति । उक्तमेतत् – 'अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवति' (म. भा. ३.४१२) इति । नायमहःशब्दः सुप्परो भवति । यत्र तु [17]लोपशब्देन लुप्यते तत्र प्रत्ययलक्षणं भवत्येव, यथा हे दीर्घाहोऽत्र, [18]दीर्घाहो निदाघ इति । अत्र हि हल्ङ्याब्भ्यः (६.१.६८/२५२) इति [19]लोपेन प्रत्ययस्य निवृत्तिः ॥

---

1. रुः इत्ययमादेशो क. 2. सजूर्ऋषिभिः मुद्रितः पाठः ह. 3. सहपूर्वस्य ड. 4. शब्दाः इत्यधिकम् ड. 5. च दाशेः ब. 6. सम्बुद्धेरर्थमेते निपात्यन्ते क, डस्प्रत्यये नास्ति ड. 7. किमर्थं – निपात्यन्ते नास्ति क. 8. नकारलोपम् क. ड. 9. ज्ञापकम् क. ड. 10. लोपाभावस्य श्रूयमाणस्य ह. 11. इत्येवं क्रियते ह. 12. हे नास्ति क. 13. अहन्नहिम् इत्यत्र ड. 14. रुत्वं क. ड. 15. उपसङ्ख्यानं कर्तव्यम् नास्ति क. 16. कर्तव्यम् नास्ति ह. 17. लोप इति ब. 18. दीर्घाह् निदाघ क. 19. लोपेन नास्ति ब.